# काशीकृत वियोगहरण स्तोत्रम्

काश्युवाच ।
नमस्ते गणनाथाय नमस्तेऽनंतरूपिणे ।
नमस्ते सर्वदात्रै वै मायाधाराय ते नमः ।।१।।

गजवक्त्रधरायैव शूर्पकर्णाय ते नमः ।
सर्वभूषाय वै तुभ्यं वक्रतुंड नमोऽस्तु ते ।।२।।

निराकाराय नित्याय निर्गुणाय गुणात्मने ।
वेदवेद्याय सततं ब्रह्मणे ते नमो नमः ।।३।।

ब्रह्मणां ब्रह्मदात्रे च सिंहारूढाय ते नमः ।
सिद्धिबुद्धिपते तुभ्यं नमः सर्वाभयंकर ।।४।।

अनाथाय च नाथाय सर्वेषां पालकाय च ।
भक्तेभ्यः सर्वदात्रे ते विघ्नहर्त्रे नमोऽस्तु ते ।।५।।

विघ्नकर्त्रे ह्यभक्तानां भुक्तिमुक्तिप्रदाय च ।
योगिनां हृदि संस्थाय योगगम्याय ते नमः ।।६।।

मनोवाणीविहीनाय शांतिरूपाय ते नमः ।
शांतेभ्यः शांतिदात्रे च गणेशाय नमो नमः ।।७।।

किं स्तौमि त्वां गणाध्यक्ष यत्र वेदाः सशास्त्रकाः ।
शांतिं प्राप्ता महाभागा अतस्त्वां प्रणमामि वै ।।८।।

रक्ष रक्ष च दासीं ते विरहेण प्रपीडिताम् ।
अविमुक्ता शिवेनैवं नाम व्यर्थं बभूव मे ।।९।।

शिवहीना कृता देव दैवं तु परमाद्भुतम् ।
अतस्ते शरणं प्राप्ता शंकरं दर्शयस्व माम् ।।१०।।

इत्युक्त्वा पतिता तस्य पादयुग्मे महामुने ।
तामुत्थाप्य गणाधीशो जगौ मधुरया गिरा ।।११।।

गणेश उवाच ।
मा शोकं कुरु कल्याणि शंकरं दर्शयामि ते ।
अविमुक्तमिदं नाम सार्थकं प्रभविष्यति ।।१२।।

त्वया कृतमिदं स्तोत्रं वियोगहरणं भवेत् ।
यः पठिष्यति भक्त्या च श्रोष्यते तस्य सुंदरि ।।१३।।

यं यमिच्छति भावेन तं तं दास्यामि सर्वगः ।
ब्रह्मभूयकरं स्तोत्रं भविष्यति न संशयः ।।१४।।

इत्युक्त्वा गणनाथश्च तत्रैवांतरधीयत ।
तमेव सापि ध्यायंती स्थिता कालप्रतीक्षिका ।।१५।।